।। अथ सप्तचत्वारिंशोऽध्याय: ।। Chapter-47

वशिष्ठ उवाच :- ततो गच्छेन्नृपश्रेष्ठ देवं बाराहरूपिणाम्
श्रद्धया यं समभ्यर्च्य न नरो नारकी भवेत् ।। १

चक्रपाणि: पुरादेव: क्षीरोदतनया तथा
विगाह्य सर्वतीर्थानि श्रीमालनगरं ययौ ।। २

उत्कण्ठया प्रदेशस्य विचरन्तौ यथासुखम्
परस्परं प्रीयमाणौ न तृप्तिमुपजग्मतु: ।। ३

विहृत्य सर्वतीर्थेषु स्नात्वा पीत्वा च सर्वत: ।।
शुचौ देशे समासीनौ परं सौख्यमुपेयतु: ।। ४

अथ देवी मरुद्वीचिकम्पिताम्बुजलोचना ।।
शिरस्यजंलिमाधाय वैकुण्ठमिदमब्रवीत् ।। ५

देव्युवाच :- इयं देव मही सर्वा सशैलवनकानना
अब्धिमध्ये स्थिता देव धार्यते केन केशव ।। ६

श्रीभगवानुवाच : मयैव धार्यते पृथ्वी महामात्रै: सहाचलै: ।
महासिन्धुजले मग्ना लीलयोद्धृत्य सुन्दरि ।। ७

ए १ विगाह्या

मम वाराहरूपस्य दंष्टाकोटिगता मही ।
बिभर्ति सर्वभूतानि स्थावराणि चराणि च ।। ८

मम विश्वम्भरा मूर्तिः सा च देवि रसातले ।।
पूज्यते नागकन्याभिर्मतिमीताभिरन्वहम् ।। ९

श्रूयते सिद्धगन्धर्वैरप्सरोभिश्च भामिनि ।।
चन्द्रसूर्यौ दृशौ तस्य कलस्त्रश्चरणादिशः ।। १०

विदिशो जानुसन्धिस्था मनवो लोमसंस्थिता ।।
मुनयो रोमकूपेषु सिद्धाः साध्यास्तथान्तरे ।। ११

मरुतो नासिकागर्भे कर्णयोरश्विनौ तथा ।। १२

दंष्ट्राकोटिगता पृथ्वी प्रश्रावे सलिलाश्रयाः ।।
गुह्ये वै सर्वगुह्यानि लाङ्गूले तीर्थसंहतिः ।। १३

सर्वास्थिषु महाशैलाः पिशिते न्नरसं पुनः ।।
पातालान्युदरे देवि पृष्ठे व्योम समन्ततः ।। १४

-०-०-

२ नागकन्याभिर्मीताभिरन्वहम्
४ बी सर्वे स्थिषु
१ ए दंष्टा
३ ए नाशिका
५ ए शीला

जिह्वायां भारती देवी लक्ष्मीश्च वपुषि स्थिता ॥
अन्त्रेषु सरितः श्रेष्टाः सर्वे कुक्षिषु सागराः ॥ १५

ब्रह्माण्डस्य कटाहो यः स्कन्धभूतः समन्ततः ॥
ककुतम्दुषाणार्थि वै भासते कुलिशाकृतिः ॥ १६

एतद्वसुमती धातुर्माभाविक्रोडरूपिणः ॥
रूपं विश्वमयं देवि नागस्त्रीभिर्निर्गीव्यते ॥ १७

एतत्स्मरति यो रूपं मम विश्वम्भरामृतः ॥
तस्यनश्यन्ति पापानि कल्याणं चोपपद्यते ॥ १८

देव्युवाच :- एतद्रूपं वराहस्य मम विष्णोः प्रदर्शय ॥
द्रष्टुमर्हसि चेद्देव प्रसीद परमेश्वर ॥ १९

श्रीभगवानुवाच :- दर्शयिष्यामि वामोरू तव तद्रूपमात्मनः ॥
समाहितमना देवि शुचिर्भूत्वा विलोकय ॥ २०

वसिष्ठ उवाच :- इत्युक्त्वा सा तदादेवी लक्ष्मी तद्गतमानसा ॥
स्नात्वा बद्धाञ्जलिं मूर्द्धिन तस्थौ पूर्वामुखी नृप ॥ २१

-०-०-

१ बी सगरा सर्वकुक्षिका
४ बी ककुदुविभूषणार्थं वै भासते कलशाकृतिः ॥
५४ ए तस्यतश्यन्ति
६ लक्ष्मीवृत
२ ए कठाहो
३ ए तम्दु
६ ए देव

ततो खिलजगद्भर्ता शंखमादाय सत्वर:
हरि: प्राध्मापयामास रोदसी पूरयन्निव ।। २२

तेन शंखप्रणादेन समाहूतो महागिरि: ।।
तुण्डमुत्पाद्य शैलाभं जगर्ज परिघर्घरम् ।। २३

ततश्चकम्पे जगती सशैलवनकानना
महाराजकरस्पृष्टा यथा शिरसि पद्मनी ।। २४

तत: शक्रादयो देवा: परिवव्रुर्नभस्तलम् ।।
दिक्पाला लोकपालाश्च सिद्धा: साध्या मरुद्गणा: ।। २५

अथ पीताम्बरधरो नीलोत्पलदलद्युति: ।।
शंखचक्रगदापाणिर्वराहवदनस्त्विह ।। २६

दंष्ट्राग्रेण महीं भित्वा प्रादुरासीदधोक्षज: ।।
महाभागो महातुण्ड: सर्वालंकारभूषित: ।। २७

पृथुकर्णो विशालाक्ष: स्मितभिन्नौष्ठसंपुट:
तत: साऽभवद्वृष्टिर्दिव्यपुष्पमयी नृप ।। २८

-०-

१ बी वदनोऽरिहा

देवदुंदुभयो नेदुस्तुष्टुवुश्च महर्षयः ।।
अथतामद्भुतांमूर्तिं दृष्ट्वा क्षीरोदसंभवा ।। २९

विस्मयोत्फुल्लनयना देवी स्तोत्रमिदं जगौ ।। ३०

श्री देव्युवाच :-

नमोस्तुतेकारणाकारणाय वेदान्तवेद्याय तमः पराय
वराहरूपाय परापराय ब्रह्माण्ड बीजाय नमो नमस्ते ।। ३१

नमः समस्तामरवन्दिताथ ब्रह्मस्वरूपाय ज्ञानमयाय ।।
षड्डूर्मिवर्याय च निर्गुणाय महौजसेऽनन्त नमो नमस्ते ।। ३२

तुण्डाग्रकर्णाविलसंव्रतासमक्षि ध्याच्छादितभूमिचक्रम् ।।
प्रलम्बबाहुपिहितान्तरालं वन्देऽखिलाधारमहं वराहम् ।। ३३

कोटीरकेयूरमणिस्त्रजानां मयोभिरुद्भासित विश्वलोकम् ।
गर्जद्घनाकारमपारपारं वन्देखिलाधारमहं वराहम्।। ३४

वनान्तसंलग्नबलाकमालाप्रकाश दंष्ट्रं ज्वलितिदीप्तनेत्रम् ।।
चक्राभानि- हुतवायुमार्गगदाब्जसंभूषितपाणिपात्रम् ।। ३५

-०-

२ ख बी नमः
४ ख बी शिखाधारमहं
१ ए भ्दू
३ ख ए संवृताश्मक्षिद्या
५ ख ए दंष्ट्रज्वलित दिप्तिनेत्र्यु

पीतांशुकश्रीसुभगं सुवक्त्रं वन्देऽखिलाधारमहं वराहम् ।
समस्तयज्ञागममयं शरीरं दधानमुग्रं जगतां हिताय ।। ३६

वरं वरेण्यं वरदं नतानां वन्देऽखिलाधारमहं वराहम् ।
प्रधानरूपं[1] पुरुषं सुरेष्टं समस्तभूतात्मकमात्मरूपम् ।। ३७

शुभं[2] पराणां परमं पुराणं सत्वादिकप्राकृतहीनमीड्यम्[3] ।।
निःकारणं कारणकार्यरूपं वन्देऽखिलाधारमहं वराहम् ।। ३८

ये पुण्यपापोपरताः प्रयत्नात् पश्यन्ति यद्रूपमपेतमोहाः ।।
यमक्षयं लक्षणबाह्यमेकं वन्देऽखिलाधारमहं वराहम् ।। ३९

अभूतपूर्वस्य भवन्ति यस्य रूपाणि सर्गस्थितिनाशहेतोः ।।
विशुद्ध[4]बोधं परमात्मरूपं वन्देऽखिलाधारमहं वराहम् ।। ४०

सर्वं[5] यतो यत्र च सर्वमेतज्जगच्चिरं विप्रमुखं प्रकाशते ।।
तं सर्वभूतत्वविकाररूपं वन्देऽखिलाधारमहं वराहम् ।। ४१

नान्तो न वृद्धिर्न समुद्भवोऽस्ति यस्य प्रभोरायति[6]वर्जितस्य ।
न व्यक्ततां प्राप्तमशेषरूपं वन्देऽखिलाधारमहं[7] वराहम् ।। ४२

-०-

१ बी प्रधानमूर्तं पुरुषं सुरेष्टं, समस्तभूतात्मक मात्मभूतम्
६ बी प्रभोरावृतिवर्जितस्य
२ ए शुभंद
३ ए मीड्यम्
४ विशुधि
७ महंन्वराहम्
५ ए स

वसिष्ठ उवाच :- इत्येवं संस्तुतो[1] देवः क्रोडरूपी जनार्दनः ।।
प्रसन्नः स्निग्धया वाचा देवीमिदमवोचत् ।। ४३

श्रीभगवानुवाच :- स्तोत्रेणानेन ते देवि तुष्टोऽस्मि कमलेक्षणे ।।
वरं वरय वामोरु यस्तवास्ते मनोगतम्[2] ।। ४४

देव्युवाच :- वरदो यदि मे देवः वराही यदि वाप्यहम्
तदिमामात्मनो मूर्तिलिंङ्गमीकुरु जगद्धिताम् ।। ४५

मया विनिर्मितश्चात्र श्रीमालेऽत्र स्थितिं कुरु ।।
निवासः सर्वतीर्थानामाश्रयश्च दिवौकसाम् ।। ४६

वसिष्ठ उवाच :- इत्युक्तः स तदा देवः संकोच निजं वपुः
अर्चितश्च सुरैर्देवै रिदमाह[3] श्रियं प्रति ।। ४७

श्रीभगवानुवाच :- इहस्थितं नरा ये मां द्रक्ष्यन्ति भुवनेश्वरि ।।
सर्वदा नफलं तेषां भविष्यति न संशयः ।। ४८

एकादशीदिने प्राप्ते सितेवाप्यसितेऽपि वा ।।
अर्चनान्मम मर्त्यानां न भवेद्यमयातना ।। ४९

-o-

२ बी यस्तवास्ते मनोगतम्

१ ए दर्वः

३ १ ए य

श्रीमाले प्रवरं क्षेत्रे तथा-विंध्ये महाचले
अर्चयिष्यन्ति ये देवि न ते भूय: शरीरिण: ।। ५०

यदन्यत्र [1]मेवत्पुंसा चातुर्मास्यनिषेवणात् ।
तद्विहैकादशीरात्रौ जागराल्लभते नर: ।। ५१

शयन्यां चप्र बोधन्यामेकादश्यामुपोषणात् ।
रात्रौ जागरणादत्र बहुस्वर्णफलं भवेत् ।। ५२

देवेशि त्वां नमस्कृत्य मां नमस्यन्ति भक्तित: ।।
प्राप्स्यन्ति मम लोकं ते नरा सत्यं ब्रवीमि ते ।। ५३

पुष्पलक्षैर्यदन्यत्र [2]पुण्यंस्यान्ममपूजनात् ।।
त्रिभिस्तु तुलसीपत्रैरिह वाराहपूजनात् ।। ५४

वसिष्ठ उवाच :-

इत्युक्त्वान्तर्दधे देवस्तत्र कृत्वांशत: स्थितिम् ।।
परामूर्तिर्मुकुन्दस्य श्रिया सह दिवं ययौ ।। ५५

तत: प्रभृति भगवान् पातालभुवनप्रिय: ।।
वराहरूपी श्रीमाले तस्थौ लोकहिताय वै ।। ५६

-०-

१ ए मेव
२ ए पुष्पंस्यान्ममसपूजनात

एकादशीषु सर्वासु यो वाराहं नमस्यति ।।
तस्य नश्यन्ति पापनि जन्मान्तरकृतान्यपि ।। ५७

वाच्यमानमिदं[1] राजन् वराहाख्यानमद्भुतम्
तस्य नश्यन्ति पापानि जन्मान्तरकृतान्यपि ।। ५८

शृणोति च पठेद्वापि नरकं न स पश्यति ।। ५९

-o-

इतिश्री वाराह महात्म्यं नाम सप्तचत्वारिंशोऽध्याय: ।। ८७

१ ए वाच्यमान इहं राजन् वराहस्याख्यान अद्भुतम्